दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणद्वादशी
फाल्गुण 16 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-128 | 1 | फरवरी 28, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुख्यमंत्रीः सुखविन्द्रसिंहसुक्खुः आईजीएमसी- शिमलायां त्रि- टेस्ला एम.आर.आई. यन्त्रस्य लोकार्पणं कृतवान्, भाजपां प्रति अपि आक्षेपान् अकरोत्

3 हिमाचलप्रदेशे लघुपादपान् उत्पाद्य अमरीका- न्यूजीलैण्ड- देशयोः सेब-फलानि प्रति प्रतिस्पर्धा

5 AI कृत्रिमबुद्धेः प्रभावसम्मेलन(एआई-सम्मिट)समीक्षा

## भारतीय नौसेनायाः शक्तिवर्धनम्, 'अञ्जदीप' नौकायाः जलावतरणम्



**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।** भारतीयनौसेनायाः सामर्थ्यं वर्धयितुं चतुर्थं पनडुब्बी-विरोधि-लघु-जलपोतम् (ASW SWC) 'अञ्जदीप' विधिवत् नौसेनायां सम्मिलितम् अभवत्। चेन्नई-बन्दरगाह इत्यत्र आयोजितस्य भव्यसमारोहस्य अध्यक्षता नौसेनाध्यक्षः एडमिरल दिनेश त्रिपाठी अकरोत्।

**स्वदेशी-निर्माणम्** - अस्य जलपोतस्य निर्माणं 'गार्डन रीच शिपबिल्डर्स एण्ड इंजीनियर्स' (GRSE) इत्यनया संस्थया कृतम्। अस्मिन् ८० प्रतिशततः अधिकाः उपकरणाः भारतीय-तकनीक्या निर्मिताः सन्ति।

**मारकक्षमता** - अयं ७७ मीटर् दीर्घः जलपोतः लघु-टॉरपीडो (Lightweight Torpedoes), पनडुब्बी-विरोधि-रॉकेट्-प्रक्षेपकैः तथा च उन्नत-सोनार-तन्त्रेण (Sonar) सज्जः अस्ति।

**उद्देश्यम्** - अस्य मुख्यं कार्यं तटीयक्षेत्रेषु पनडुब्बी-विरोधि-अभियानानां सञ्चालनम् तथा च शत्रु-पनडुब्बीभ्यः भारतीय-समुद्रतटस्य रक्षणं वर्तते।

**ऐतिहासिकं महत्त्वम्** - अस्य पोतस्य नाम कारवार-तटस्य समीपे स्थितात् सामरिकदृष्ट्या महत्त्वपूर्णात् 'अञ्जदीप' द्वीपात् गृहीतम् अस्ति।

**नौसेनाध्यक्षस्य वक्तव्यम्** - "अञ्जदीप-पोतस्य आगमनेन अस्माकं समुद्री-सीमायाः सुरक्षा अभेद्या भविष्यति। इदं 'मेक इन् इण्डिया' इति सङ्कल्पस्य सिद्धेः निदर्शनम् अस्ति।"

## विकसितभारतस्य संकल्पना युवाभिः एव सिद्धा भविष्यति
### उपराष्ट्रपतिः राधाकृष्णनः



उपराष्ट्रपतिः सी.पी. राधाकृष्णनः उक्तवान् यत् २०४७ (सप्तचत्वारिंशदधिक-द्विसहस्र) तमवर्षं यावत् 'विकसित-भारतस्य' संकल्पना सशक्तैः सुशिक्षितैः च युवाभिः एव सिद्धा भवितुं शक्नोति। श्री राधाकृष्णनः अद्य नवदिल्ल्यां भारतीय-जनसञ्चार-संस्थानस्य (IIMC) ५७ तमे दीक्षान्त-समारोहे सम्बोधनकाले एतद् प्रतिपादितवान्। उपराष्ट्रपतिः छात्रान् राष्ट्रिय-प्रगतेः मुख्याः 'ध्वजवाहकाः' इति अवदत्। तेन उक्तं यत् देशस्य विकासः उत्तम-शिक्षायाः तथा यूनां क्षमतानां च सह घनिष्ठरूपेण सम्बद्धः अस्ति।उपराष्ट्रपतिना महत्त्वाकांक्षिणः पत्रकारान् मीडिया-वृत्तिकान् च निर्मातुं प्रति भारतीय-जनसञ्चार-संस्थानस्य अटूट-प्रतिबद्धतायाः प्रशंसा कृता। सः अवदत् यत्—"पत्रकारितायां तथ्यानां सत्यनिष्ठया लेखनेन प्रस्तुतीकरणेन च राष्ट्रस्य दिशाम् प्रभावितुं सामर्थ्यं वर्तते।"अस्मिन् अवसरे सूचना-प्रसारणमन्त्री अश्विनी वैष्णवः अपि राष्ट्रस्य विकासे छात्राणां महत्त्वपूर्णां भूमिकां रेखाङ्कितवान्। सः शिक्षायां प्रौद्योगिक्याः (Technology) वर्धमानस्य प्रभावस्य अपि उल्लेखं कृतवान्।अस्य कार्यक्रमस्य भागतया उपराष्ट्रपतिना भारतीय-जनसञ्चार-संस्थानस्य परिसरे एकस्य नूतन-शैक्षणिक-खण्डस्य तथा छात्रावास-भवनस्य च आधारशिला अपि स्थापिता।

## राष्ट्रपतिः द्रौपदीमुर्मुः 'प्रचंड' इति युद्धक-विमाने उड्डयनं कृतवती



**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।** राष्ट्रपतिः द्रौपदीमुर्मुः राजस्थानस्य जैसलमेर-वायुसेना-स्थानके स्वदेशनिर्मितस्य युद्धक-विमानं-'प्रचंड' इत्यस्मिन् उड्डयनं कृतवती। उड्डयनात् पूर्वं वायुसेनायाः अधिकारिणः राष्ट्रपतिं प्रति अस्य युद्धक-विमानस्य परिचालन-क्षमतायाः विषये विस्तृतं विवरणं दत्तवन्तः। एतत् उड्डयनं वायुसेनायाः अनुभवी-चालकैः संचालितम्, यस्मिन् स्वदेशी-यन्त्रस्य उन्नत-विशेषतानां तथा च युद्ध-सज्जतायाः प्रदर्शनं कृतम्। 'प्रचंड' इति युद्धक-विमानं विशेषतः उन्नत-शिखर-प्रदेशेषु (High altitude) कार्याणि कर्तुं निर्मितम् अस्ति, येन भारतीय-वायुसेनायाः युद्धक-सामर्थ्यं सुदृढं जातम्।

**रक्षा-क्षेत्रे स्वदेशी-प्रयासस्य प्रशंसा**
अस्मिन् अवसरे राष्ट्रपतिः वायुसेनायाः वरिष्ठ-अधिकारिभिः सह संवादं कृतवती। सा भारतस्य स्वदेशी-रक्षा-निर्माण-पारिस्थितिकी-तन्त्रस्य (Defense manufacturing ecosystem) विकासे संलग्नानां वैज्ञानिकानां, अभियन्तॄणां (Engineers) तथा च कर्मचारिणां महतीं प्रशंसां कृतवती।

**'वायु शक्ति' गति अभ्यासस्य निरीक्षणम्**
राष्ट्रपतिः पोखरण-फायरिंग-रेंज मध्ये भारतीय-वायुसेनायाः 'वायु शक्ति' इति अभ्यासस्य निरीक्षणमपि कृतवती। अत्र अग्रिम-पङ्क्तेः युद्धक-विमानानि, परिवहन-विमानानि तथा च हेलीकॉप्टर-यन्त्राणि अहोरात्रं युद्ध-कौशलस्य प्रदर्शनं कृतवन्तः।

## भारतं स्वशक्तिं सामर्थ्यं च अभिज्ञातवान्: प्रधानमंत्री मोदी

प्रधानमंत्री नरेन्द्रमोदी उक्तवान् यत् भारतेन गतेषु एकादशवर्षेषु (११ वर्षेषु) स्वकीयां शक्तिं सामर्थ्यं च सम्यक् अभिज्ञातम्। सः अकथयत् यत् तस्य सर्वकारः एतां परिकल्पनां साकारं कर्तुं निरन्तरं प्रयासं कुर्वन् अस्ति।नवदिल्ल्यां एकस्मिन् कार्यक्रमे श्रीमोदी अवदत् यत् पूर्वं भारतीयसमाजे हीनभावना व्याप्ता आसीत्। तेन प्रतिपादितं यत् भारतं पूर्वं पाश्चात्यजगतः अनुकरणं करोति स्म तथा च पाश्चात्य-मान्यतां प्राप्तुम् इच्छति स्म, किन्तु इदानीं तादृशी स्थितिः नास्ति।श्रीमोदी उक्तवान् यत् स्वातन्त्र्यात् परम् अपि देशः एतस्याः मानसिकतया बहिः आगन्तुं न शक्तवान्। एतस्मात् कारणात् एव केचन जनाः अद्यापि विस्मिताः भवन्ति यत् विकसितदेशाः भारतस्य सह व्यापारिक-सम्झौतान् (Trade Agreements) कर्तुं किमर्थं उत्सुकाः सन्ति। प्रधानमन्त्रिणा अस्मिन् विषये बलं दत्तं यत्—"भारतम् इदानीं नीतिगत-गतिरोधात् (Policy Paralysis) मुक्तं वर्तते।"

## सुभाषितम्
**उज्ज्वलगुणमभ्युदितं,**
**क्षुद्रो दृष्टं च कथमपि क्षमते।**
**दग्ध्वा तनुमपि शलभो,**
**दीपं दीपार्चिषं हरति।।**

भावार्थः- क्षुद्र व्यक्ति अन्यों की कीर्ति तथा गुणों में वृद्धि देखकर कभी उन्हें क्षमा नहीं करते, और सदैव उन्हें हानि पहुंचाने के लिए वैसे ही प्रयत्नशील रहते हैं जिस प्रकार एक प्रज्वलित दीप के प्रकाश को देख शलभ अपने तन को जला कर दीपक की ज्योति को बुझा देते हैं।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## वैश्विक-अनिश्चिततासु अपि भारतस्य आर्थिक-प्रदर्शनं सुदृढम्: अनन्त-नागेश्वरन्

मुख्य-आर्थिक-परामर्शदाता (CEA) अनन्त-नागेश्वरन् उक्तवान् यत् वैश्विक-अनिश्चिततानां प्रचलने अपि देशस्य आर्थिकं प्रदर्शनं सुदृढं वर्तते। नवदिल्ल्यां सकल-घरेलु-उत्पादस्य (GDP) नवीन-आकडानां विषये सः अवदत् यत्—
"गतेषु सन्तत-त्रिवर्षेषु सप्तप्रतिशततः (7%) अधिका 'वास्तविक-जीडीपी-वृद्धिः' अर्थव्यवस्थायाः व्यापक-दृढतां सूचयति।"श्री नागेश्वरन् अकथयत् यत् व्यापक-आर्थिक-गतिविधिनां कारणात् भारतीय-अर्थव्यवस्थायाः संवर्धन-दरः (Growth Rate) स्थिरा अस्ति। तेन उक्तं यत् भारतं कतिपयेषु वर्षेषु एव विश्वस्य तृतीय-बृहत्तमा अर्थव्यवस्था भवितुं अग्रसरं वर्तते।

# मुख्यमंत्रीः सुखविन्द्रसिंहसुक्खुः आईजीएमसी-शिमलायां त्रि- टेस्ला एम.आर.आई. यन्त्रस्य लोकार्पणं कृतवान्, भाजपां प्रति अपि आक्षेपान् अकरोत्



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमंत्री सुखविन्द्रसिंहसुक्खुः शुक्रवासरे आई. जी. एम. सी. शिमलायां त्रि-टेस्ला एम. आर. आई. यन्त्रस्य लोकार्पणं कृतवान्। अस्मिन् अवसरे सः उक्तवान् यत् एकस्मिन् वर्षे अन्तर्गते आई. जी. एम. सी. शिमला, चमियाना, नेरचौकं, हमीरपुरं टांडा- चिकित्सामहाविद्यालयेषु एम्स- दिल्ली-न्यायेन उच्चस्तरीय- यन्त्राणि स्थाप्यन्ते। आईजीएमसी- मध्ये नवीन-त्रि-टेस्ला- एम. आर. आई. यन्त्रस्य शुभारम्भात् अनन्तरं मुख्यमंत्री उक्तवान् यत् चिकित्सालये विंशतिवर्षं प्राचीनं एम. आर. आई. यन्त्रं परिवर्तितम् अस्ति। एषा शासनस्य चिन्ता, व्यवस्था-परिवर्तनस्य च द्योतिका अस्ति यत् विना याचनां शासनम् आधुनिकयन्त्राणि स्थापयित्वा सामान्यजनेभ्यः उत्कृष्टचिकित्सां दातुं प्रयतते। प्रयासः अयं यत् हिमाचलस्य रोगिणः उपचारार्थं पीजीआई चंडीगढं निजी- चिकित्सालयान् प्रति न गच्छेयुः।तेन पूर्व-भाजपा-शासनं प्रति आक्षेपः कृतः। सः उक्तवान् यत् रेडियोलॉजीविभागस्य वैद्यैः निवेदितम् आसीत् यत् आईजीएमसी, के. एन. एच. च मध्ये प्राचीनयन्त्राणि सन्ति। पूर्व-शासनेन तानि न परिवर्तितानि, केवलं स्व-मित्राणां लाभाय कार्यं कृतम्। पूर्व-भाजपाशासनाय केन्द्रात् आरडीजी निधेः ५४००० कोटि-रूप्यकाणि, समग्रेण ७०००० कोटि-रूप्यकाणि प्राप्तानि, तथापि जन-सुविधार्थं यन्त्राणि न परिवर्तितानि। भाजपा प्रदेश-विरोधिनी किमर्थम्? आरडीजीविषये ते सहकार्याय न सज्जाः सन्ति। हिमाचलपुलिस उत्तमं कार्यं करोति, तस्याः अपि विरोधः क्रियते। दिल्ली-पुलिस, हिमाचल-पुलिसयोः मध्ये जातं विवादं प्रति मुख्यमंत्री उक्तवान् यत् दिल्ली-पुलिसेन कस्यापि कार्यवाह्याः पूर्वं हिमाचल-पुलिसं सूचितव्यम् आसीत्। अस्मिन् विषये नेता-प्रतिपक्षः जयरामठाकुरस्य वक्तव्यं प्रति सः उक्तवान् यत् सः मन्यते- दिल्ली तथा हरियाणा-पुलिस हिमाचले यथेष्टं कर्म कुर्युः इति।

# इष्ट-वाहन-सङ्ख्यां विक्रीय १०० कोटिरूप्यकाणाम् आयः, परिवहनविभागेन वित्तीयप्रबन्धने कृतं श्रेष्ठं कार्यम्- उपमुख्यमन्त्री



**हिमसंस्कृतवार्ताः- ऊना।** राज्यपरिवहनविभागेन वित्तीयप्रबन्धने प्रशंसनीयं कार्यं कृतम् अस्ति। विभागेन विविधमाध्यमैः प्रायः सहस्रकोटि (१००० Cr) रूप्यकाणां राजस्वं सङ्गृह्य उल्लेखनीया उपलब्धिः प्राप्ता। अस्यै उपलब्धये केन्द्रसर्वकारेण ९३ कोटिरूप्यकाणां प्रोत्साहनराशिः अपि प्रदत्ता अस्ति। उपमुख्यमन्त्री मुकेश अग्निहोत्री महोदयः गुरुवासरे कुङ्गड़त-क्षेत्रे नूतनपञ्चायत-सामुदायिककेन्द्र-भवनस्य लोकार्पणप्रसङ्गे अवदत् यत् विभागेन केवलं 'इष्ट-वाहनसङ्ख्या' (Choice Number) प्रक्रियया एव प्रायः १०० कोटिरूप्यकाणां आयः अर्जितः, यः विभागस्य पारदर्शिनीं प्रभावशालिनीं च कार्यप्रणालीं दर्शयति। प्रदेशसर्वकारः परिवहनक्षेत्रं सुदृढं, पारदर्शिनं, जनहितैषिणं च कर्तुं निरन्तरं कटिबद्धः अस्ति, भविष्ये अपि ईदृशाः निर्णयाः ग्रहीष्यन्ते येन सामान्यानां जनानां परिवहनसम्बद्धानां हितधारकाणां च साक्षात् लाभः भवेत्। अस्मिन् अवसरे मुकेश अग्निहोत्री महोदयः अवदत् यत् प्रदेशसर्वकारेण वाहनानां 'अनुमति अवधिः' (Permit period) १२ वर्षेभ्यः वर्धयित्वा १५ वर्षाणि कृता अस्ति। सः उक्तवान् यत् सङ्घस्य (Association) अभ्यर्थनायां एषः विषयः पक्षस्य निर्वाचनीये घोषणापत्रे सम्मिलितः आसीत्। सर्वकारस्य सङ्घटनस्य पश्चात् यदा विषयस्य समीक्षा कृता, तदा ज्ञातं यत् एषः विषयः राज्यसर्वकारस्य स्थाने केन्द्रसर्वकारस्य अधिकारक्षेत्रे आगच्छति। एतां विसङ्गतिं दूरीकर्तुं प्रदेशसर्वकारेण गम्भीरतया प्रयासः कृतः, प्रकरणं च केन्द्रसर्वकारस्य समक्षं प्रस्थापितम्। फलतः न केवलं हिमाचलप्रदेशस्य, अपि तु सम्पूर्णदेशस्य 'टैक्सी-चालकाः' अनेन लाभान्विताः अभवन्। सः अवदत् यत् एषः निर्णयः दीर्घकालात् प्रचलन्तीं राष्ट्रियस्तरीयां विसङ्गतिं दूरीकर्तुं महत्त्वपूर्णं पदम् अस्ति।

# हिमाचलप्रदेशे स्वदेशी-मधुमक्षिकाणां संरक्षणार्थं "हिमालयन-बी-पार्क" निर्मास्यन्ते, पर्यटकानां छात्राणां च कृते विशेष-केन्द्रं भविष्यति

हिमसंस्कृतवार्ताः- शिमला ।हिमाचलप्रदेशस्य उद्यानविभागः लुप्यमानानां स्वदेशी-मधुमक्षिकाणां (एपीस सेराना) संरक्षणार्थं नूतनप्रारम्भम् आरभते। विभागेन अस्यार्थं विशेषाः "हिमालयन बी पार्काः" निर्मीयन्ते। अस्य कृते शिमला, कांगड़ा, ऊना-जनपदाः चयनिताः सन्ति।पर्वतीय-मधुमक्षिका स्थायित्व-स्वभावयुक्ता सर्वासु परिस्थितिषु अनुकूलिता अस्ति, अतः अस्याः संरक्षणम् अत्यावश्यकम् अभवत्। विभागः परीक्षणरूपेण एतान् बी-पार्कान् निर्माति, यत्र मधुमक्षिकाणां संरक्षणं भविष्यति। कृषकाणां तासां पालनप्रशिक्षणं दास्यते, उद्यानेषु च पुष्पपादपाः अपि रोप्यन्ते। एकस्मिन् हेक्टेयरक्षेत्रे १०० एपीस सेराना मधुमक्षिकाणां मृन्मयमधुकोषाः निर्मास्यन्ते, १०० काष्ठ-पेटिकाः एपीस मेलिफेरा मधुमक्षिकाणां स्थाप्यन्ते।

अतिरिक्ततया मधु, तेन निर्मिताः प्राकृतिक-उत्पादाः चापि अत्र उपलब्धाः भविष्यन्ति। एते पार्काः यत्र एकतः पर्यटकानाम् आकर्षणकेंद्रं भविष्यन्ति, तत्रैव विद्यालय- महाविद्यालय-छात्राणां कृते शैक्षणिककेन्द्ररूपेण अपि कार्यं करिष्यन्ति। विभागस्य सांख्यिकानुसारं प्रदेशे प्रायः १.२० लक्ष-हेक्टेयरक्षेत्रे सेबकृषिः क्रियते। एकस्मिन् हेक्टेयरक्षेत्रे ऋतौ परागणार्थं चत्वारि मधुपेटिकाकोषाः आवश्यकाः भवन्ति। वर्तमानकाले स्वदेशी- मधुमक्षिकाणां प्रजातयः लोपसीम्नि स्थिताः सन्ति। उपवनेषु परागणार्थं प्रायः इटालियन-मधुमक्षिकाः (एपीस मेलिफेरा) उपयुज्यन्ते। एताः स्वदेशी-मधुमक्षिकाभ्यः अधिकं मधु उत्पादयन्ति, किन्तु गुणवत्तायां स्वदेशी एपीस सेरानामधु श्रेष्ठतरं मन्यते। उद्यानविभागेन "हिमालयन-बी-पार्क" पीसीडीओ- सुन्नीस्थले निर्मीयते। तथैव कांगड़ाजनपदे पीसीडीओ गुम्मरस्थले, ऊनाजनपदे पीसीडीओ- सलोहस्थले अपि निर्मास्यते। विभागेन राष्ट्रीय- मधुमक्षिका-बोर्डाय परियोजना निर्माय प्रेषिता अस्ति।

*अनेकासु कृषिषु मधुमक्षिकाणां आवश्यकता भवति, भविष्यति च अस्याः मागधिः (मांग) वर्धिष्यते। हिमालयन-बी-पार्काः अस्मिन् विषये सहायकाः सिद्धयिष्यन्ति। विदेशी-मधुमक्षिकाः १८– २४ अंश तापमाने अधिकं परागणं कुर्वन्ति, यदा स्वदेशी-मधुमक्षिकाणां कृते १५–२२ अंश सेल्सियस-तापमानं सर्वोत्कृष्टं मन्यते।*

**-डॉ. दलीप-नरगोटा,मौन-पालन-विशेषज्ञः, उद्यान-विभागः, शिमला।**



*"हिमालयन-बी-पार्क"-निर्माणस्य मुख्य-उद्देश्यं हिमालयीय-स्वदेशी- मधुमक्षिकाणां संरक्षणं, बागवानी-कृषि-फसलानां परागण-सेवासु सुधारः, ग्रामीण-युवकानां महिलानां च क्षमता-विकासः अस्ति। १०० अधिक-बागवानानां मधुमक्षिका- पालन- प्रशिक्षणम् अपि दास्यते। अनुमोदनं प्राप्ते अस्मिन् एव वर्षे एते पार्काः निर्मिताः सज्जाः भविष्यन्ति।*

**-डॉ. सतीशकुमारशर्मा, निदेशकः, उद्यानविभागः, हिमाचल-प्रदेशः।**

# सिरमौर-जनपदे लोक-निर्माणविभागस्य मण्डलानां पुनर्सङ्घटनम्, अधिसूचना निर्गता




हिमसंस्कृतवार्ताः- शिमला।राज्यस्य सिरमौरजनपदे लोकनिर्माणविभागस्य प्रशासनिकसंरचनायां महत्परिवर्तनं कृत्वा मण्डलानां (Divisions), उपमण्डलानां, अनुभागानां च पुनर्सङ्घटनं कृतम्। अस्मिन् विषये लोकनिर्माणविभागस्य सचिवेन अधिसूचना अपि निर्गता। सर्वकारस्य एते आदेशाः तत्कालं प्रभावशीलाः भविष्यन्ति। सर्वकारेण नाहनमण्डलस्य 'ददाहू' उपमण्डलं 'सङ्गड़ाह' मण्डले स्थानान्तरितम् अस्ति। सर्वकारेण स्पष्टीकृतं यत् येषां क्षेत्राणां प्रशासनिकनियन्त्रणं परिवर्तितं, तत्र कार्यरत कर्मचारिणः अपि नूतनमण्डलस्य अधीनं भविष्यति। यन्त्राणि (Machinery) अपि तदनुसारं स्थानान्तरितानि भविष्यन्ति। चलितकार्याणाम् अनुबन्धाः (Contracts) न्यायालयेषु लम्बितप्रकरणाः च नूतन-सम्बन्धित- कार्यालयैः द्रष्टव्याः भविष्यन्ति।

### सङ्गड़ाह-मण्डलस्य सुदृढीकरणम्

अधिसूचनानुसारं सिरमौरजनपदे लोकनिर्माणविभागस्य सङ्गड़ाह-मण्डलम् अधुना जनपदे विशालतमं मण्डलं भविष्यति। अस्मिन् मण्डले बोगधार, नोहराधार, हरिपुरधार, पीआईयू सङ्गड़ाह, रेणुकाजी तथा ददाहू उपमण्डलाणि सम्मिलितानि सन्ति। पुनर्सङ्घटनानन्तरं मार्गाणां दैर्घ्यं (Length) इत्थं वर्तते:

| उपमण्डलस्य नाम | मार्गाणां दैर्घ्यं (कि.मी.) |
|---|---|
| ददाहू | २८३.३१० |
| रेणुकाजी | २१८.६६७ |
| हरिपुरधार | १९७.२५० |
| बोगधार | १४७.८५० |
| नोहराधार | १३७.१५५ |
| पीआईयू सङ्गड़ाह | १११.२९५ |
| कुल योगः | १०९५.५२७ |

### पावँटा, नाहन शिलाई मण्डलानां नूतनव्यवस्था

पावँटा-मण्डलम्:- एतत् मण्डलं द्वयोः उपमण्डलयोः व्यवस्थितं कृतम्। पावँटा-१ मध्ये पुरुवाला, जामनी-वालादयः अनुभागाः सन्ति। पावँटा-२ मध्ये वङ्गण, राजवन-आदयः सन्ति। अत्र 'राजपुरा' अनुभागः शिलाई-तः आनीतः। अस्य मण्डलस्य कुल-मार्ग-दैर्घ्यं ३४५.११० कि.मी. अभवत्।

नाहन-मण्डलम्:- नाहन-उपमण्डले जामटा, बनेठी-आदयः अनुभागाः सन्ति। धौलाकुआँ-उपमण्डले कोलर, माजरा-आदयः योजिताः। सम्पूर्ण-नाहन-मण्डलस्य मार्ग-दैर्घ्यं ४८१.८९५ कि.मी. निर्धारितम्।

शिलाई-मण्डलम्: अत्र पञ्च उपमण्डलाः (शिलाई, रोहनाट, टिम्बी, कमरऊ, सतौन) निर्मिताः। पुनर्गठनोत्तरं अस्य मण्डलस्य मार्ग-दैर्घ्यं ५४५.६४९ कि.मी. सञ्जातम्।

# हमीरपुरं प्राप्तः मुख्यमंत्री निर्माणाधीन-हेलीपोर्ट-बसस्थानकयोः निरीक्षणं कृतवान्, अधिकारिणः निर्देशिताः

हिमसंस्कृतवार्ताः - हमीरपुरम्। मुख्यमंत्री सुखविंदरसिंहसुक्खूः हमीरपुर जनपदस्य अन्तर्गतस्य जसकोट-स्थले अष्टादश-कोटि-रूप्यक-व्ययेन निर्माणाधीनस्य हेलीपोर्ट-इत्यस्य निरीक्षणं कृतवान्। सः अधिकारिणः निर्देशितवान् यत् अस्य निर्माणकार्ये शीघ्रता आनीयताम् तथा एतत् कार्यं अस्य वर्षस्य मई-मासपर्यन्तं पूर्णं क्रियताम्।मुख्यमन्त्रिणा उक्तं यत् हिमाचल-राज्ये पर्यटन-विकासाय राज्य-सर्वकारः प्रतिबद्धः अस्ति, पर्यटकानां सुविधार्थं च संयोजकता (कनेक्टिविटी) अधोसंरचना-विस्तारः च प्राथमिकतया क्रियते। पर्यटन-विकासेन राज्यस्य आर्थिकी सुदृढा भविष्यति तथा युनां कृते जीविका-स्वजीविका-अवसराः अपि सृज्यन्ते इति सः अवदत्।

सः अपि अवदत् यत् राज्य-सर्वकारेण प्रत्येकस्य जिला-मुख्यालयस्य अन्येषां प्रमुख-पर्यटन-स्थलानां च हेलीपोर्ट-निर्माणं क्रियते। अद्यतन-काले सञ्जौली-हेलीपोर्टतः चण्डीगढ़ं तथा रिकोंगपियों प्रति हेलीकॉप्टर-सेवाः आरब्धाः, येन पर्यटकाः राज्यस्य प्रमुख-पर्यटन-स्थलानि सुगमतया प्राप्तुं शक्नुवन्ति।अस्य अतिरिक्तं संजौली-रामपुर-रिकांगपिओ तथा संजौली-मनाली (सासे-हेलीपैड) इत्येतयोः मार्गयोः अपि शीघ्रमेव हेलीकॉप्टर-सेवाः आरभ्यन्ते।

मुख्यमन्त्रिणा १२३-कोटि-रूप्यक-व्ययेन निर्मीयमाणस्य हमीरपुर-बसस्थानकस्य अपि निरीक्षणं कृतम्। तेन उक्तं यत् उभयोः परियोजनयोः कार्यं तीव्रतया प्रचलति तथा निर्धारित-समयसीमायां पूर्णं भविष्यति, येन जिला-निवासिनां महती सुविधा भविष्यति।

अस्मिन् अवसरे विधायकः सुरेश-कुमारः तथा कैप्टन-रणजीत-सिंहः, पूर्व-विधायिका अनीता-वर्मा, कांगड़ासहकारीकृषि-ग्रामीणविकासवित्तकोषस्य अध्यक्षः रामचन्द्र-पठानिया, हिमाचलप्रदेकृषिविपणनमण्डलस्य अध्यक्षः कुलदीप-सिंह-पठानिया, APMC Hamirpur-अध्यक्षः अजय-शर्मा, जिला-कांग्रेस-अध्यक्षः सुमन-भारती, कांग्रेस-नेता डॉ. पुष्पिन्दर-वर्मा, सुभाष-ढटवालिया, रूबल-ठाकुर, सचिवौ एम्-सुधा-देवी तथा आशीष-सिंघमार, उपायुक्तः गंधर्वा-राठौर, पुलिस-अधीक्षकः बलबीर-सिंहः अन्ये च गणमान्याः उपस्थिताः आसन्।



# हिमाचलप्रदेशे लघुपादपान् उत्पाद्य अमरीका-न्यूज़ीलैण्ड- देशयोः सेब-फलानि प्रति प्रतिस्पर्धा






## सुनीलः सेब-उद्यानकीक्षेत्रे नूतनां कथा लिखति

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशस्य सेब- उद्यानपालकाः लघुपादपान् उत्पाद्य अमरीका, न्यूज़ीलैण्ड तथा यूरोपीय-संघस्य सेबफलानि प्रति प्रतिस्पर्धां ददति। एतेषु देशेषु आगच्छतां सेबफलानाम् आयातशुल्कं ५० प्रतिशततः न्यूनं कृत्वा २०–२५ प्रतिशतपर्यन्तं कृतम् अस्ति। अस्य कारणात् प्राचीन-प्रजातीनां मागधिः न्यूनता-आशङ्कया अनेकाः युवा- उद्यानपालकाः सज्जीभूताः सन्ति। ते एकस्मिन् बीघापरिमिते क्षेत्रे न्यूनातिन्यूनं ३५० लघु -पादपान् रोपयन्ति। एकः पादपः २० किलोग्राम-परिमितस्य एकस्य कार्टनस्य उपजं दातुं शक्नोति। विशालाकार- पादपाः तु एकस्मिन् बीघायां केवलं ४०–५० एव रोपयितुं शक्यन्ते, ते च प्रति-पादपं केवलं त्रयाणां कार्टनानाम् उपजं ददति। फलानां वर्णे आकारे च महान् भेदः दृश्यते। राजधानी-शिमलातः प्रायः ५० किलोमीटर-दूरे शिमला-जनपदस्य ठियोग-उपमंडलस्य क्यार- ग्रामपञ्चायतस्य जईग्रामः अस्ति। अयं ग्रामः प्रसिद्ध- परालामण्ड्याः केवलं षट् किलोमीटरदूरे स्थितः। जई-निवासी सुनीलशर्मा आशङ्कितः अस्ति यत् अमेरिका, न्यूज़ीलैण्डः, यूरोपीयसंघस्य सेबफलानाम् आयातशुल्कन्यूनतया तस्य उत्तममूल्यं न लभ्येत। अतः सः विदेश-देशानां न्यायेन लघु-पादपाधारित- उच्चप्रौद्योगिकीया सेबकृषेः नूतनप्रयोगान् करोति। तेन एम-९ (M9) रूट-स्टॉक-आधारे १७०० पादपाः रोपिताः। एतेषु रेड-डिलिशियस, गाला-श्रेण्योः प्रजातयः सन्ति।

क्यार-ग्रामस्य दीपक मेहता अपि अस्यैव प्रौद्योगिक्याः प्रयोगं कृत्वा सप्त-अष्टवर्षेभ्यः बागवानीं करोति। तस्य समीपे ४००० लघुपादपाः सन्ति। तस्य पिता दिलाराम मेहता वदति यत् सः राजनीतितः निवृत्य पूर्णकालिक-बागवानीं आरब्धवान्। जई-ग्रामस्य नरेन्द्र शर्मा अपि ३०० पादपान् रोपितवान्। समोलनिवासी सुरेश शर्मा अपि लघुपादपान् स्थापितवान्। ठियोग-क्षेत्रस्य विधायकः कुलदीपसिंह राठौरः उक्तवान् यत् एतेषां उद्यानपालकानां साहाय्यं कथं शासकीय-स्तरे कर्तव्यम्, अस्य विषये अपि विचारः भविष्यति।

### एतेषां पादपानाम् उत्पादने कश्मीरः हिमाचलात् अग्रे अस्ति- कुनालः

इटलीदेशात् लघुपादपान् आयात्य उद्यानपालकेभ्यः प्रदातुं यः कार्यं करोति सः कुनाल चौहानः वदति यत् एतेषां पादपानां उत्पादने कश्मीरप्रदेशः हिमाचलात् अग्रे अस्ति, यतः तत्र भूमिः समतला अस्ति, अतः रोपणं सुकरं भवति। तत्र शासनं उद्यानपालकेभ्यः उत्तमम् उपदानम् (अनुदानम्) अपि ददाति। हिमाचल-शासनस्य अपि अस्मिन् क्षेत्रे अधिकं ध्यानं दातव्यम्। कमाह निवासी कुलदीपकान्तशर्मा अपि रूट- स्टॉक- आधारेण १८०० पादपान् रोपितवान्। सः एम-९ (M9) सहितं एमएम-१११ (MM111) तथा एमएम-१०६ (MM106) रूट-स्टॉकान् प्रभावकरान् मन्यते। काशोग्रामस्य सेनानिवृत्तः जोगेन्द्रकंवरः अपि ५०० पादपान् उत्पादितवान्।

# महर्षिमहेशयोगीवैदिकविश्वविद्यालये वेद-योगविभागद्वारा
# आयोजिता एकदिवसीया व्याख्यान-संगोष्ठी सुसम्पन्ना




महर्षिमहेशयोगीवैदिकविश्वविद्यालय-ब्रह्मस्थान-करौंदी, कटनी, मध्यप्रदेशस्य माननीयकुलगुरोः संरक्षणेन भारतीयज्ञानपरम्परासंकायान्तर्गतवेद-योगविभागाभ्यां दिनाङ्के २७/०२/२०२६ तमे अपराह्ने २:३० वादने, वेदविभागस्य डिजिटलकक्षे एकदिवसीया व्याख्यानसंगोष्ठी सफलतया सुसम्पन्ना।अस्याः संगोष्ठ्याः मुख्योद्देश्यः योगशास्त्रोक्तानाम् आसन-प्राणायाम-शुद्धिक्रियाणां च वैदिक-आधुनिकविज्ञानयोः परिप्रेक्ष्ये तुलनात्मक-अध्ययनस्य प्रस्तुतीकरणम् आसीत्। अनेन विद्यार्थिनः भारतीयवैदिकज्ञानपरम्परायाः समकालीनयोगविज्ञानस्य च समन्वितदृष्टिकोणस्य सुस्पष्टं बोधम् अलभन्त।कार्यक्रमस्य शुभारम्भः गुरुपूजनपूर्वकं श्री-स्वतन्त्र-द्विवेदी-महोदयेन श्रीमती-पुष्पलता-द्विवेदी-महोदयया च कृतः। वेदविभागीयच्छात्रौ आयुष-शर्मा तथा मोहित-त्रिपाठी च वैदिकमङ्गलाचरणं कृतवन्तौ।
कार्यक्रमसंयोजकः वेद विभगाध्यक्षः डॉ. आलोकचन्द्रपरिडामहोदयः समागतानाम् अतिथीनां स्वागतं परिचयं च कृतवान्। कार्यक्रमसमन्वयकः योग विभागाध्यक्षः डॉ. नित्येश्वरचतुर्वेदीमहोदयः विषयप्रवेशप्रस्तुतीकरणे वेदोपनिषद्योगग्रन्थेषु वर्णितानाम् आसन-प्राणायामानां आधारभूतसंकल्पनाः स्पष्टीकृत्य आधुनिकवैज्ञानिकानुसन्धानानां सन्दर्भे तेषां उपयोगितां निरूपितवान्। सारस्वतातिथिः डॉ. खुशेन्द्रदेवचतुर्वेदीमहोदयः विद्यार्थिनः योगस्य व्यावहारिकपक्षं स्वजीवने अंगीकरणाय प्रेरितवान् तथा स्वस्थजीवनशैलीनिर्माणे योगस्य भूमिकां प्रकाशयामास।ततः मुख्यवक्त्री डॉ. स्मृतिनायकमहोदया स्वव्याख्याने योगिक-शुद्धिक्रियाणां, प्राणायामस्य शारीरिक-मानसिक-प्रभावशीलतायाः तथा आधुनिक-चिकित्साविज्ञाने तेषां स्वीकृतेः विषये विस्तरेण प्रकाशं प्राक्षिपत्। अनया योगः केवलं आध्यात्मिक-साधना न, अपितु वैज्ञानिकजीवनपद्धतिरिति प्रतिपादिता।तदनन्तरं स्वीयाध्यक्षीय-उद्बोधने डॉ. के.के. त्रिपाठीमहोदयः अस्याः संगोष्ठ्याः प्रशंसां कृत्वा भारतीयज्ञानपरम्परायाः वैज्ञानिकतां रेखाङ्कितवान्। तेन उक्तं यत् योगः भारतीयसंस्कृतेः अमूल्य-धरोहरः अस्ति, यस्य आधुनिक-परिप्रेक्ष्ये प्रमाणं प्रसारणं च अनिवार्यम् इति। अनन्तरं समागतानाम् अतिथीनां सम्मानं जातम्। तदनु योगविभागस्य सहप्राध्यापकः डॉ. श्याम-बाबू-खरे-महोदयः धन्यवादज्ञापनं कृतवान्। कार्यक्रमस्य कुशल-संचालनं डॉ. नेहामिश्रामहोदया सुव्यवस्थितरूपेण कृतवती। अस्यां संगोष्ठ्यां विश्वविद्यालयस्य विविध-विभागानां विभागाध्यक्षाः, डॉ. राघवेन्द्र-कलचुरी, डॉ. चन्द्रशेखर-मिश्रः, डॉ. हसमुख-लालः, डॉ. अंकित-कैलाशी-राठौरः, भा.ज्ञा.प सङ्कायशिक्षकाः श्रीधनीरामत्रिपाठी, श्रीहरिनारायणशर्मा, श्रीसत्य-नारायणशुक्लः, श्रीध्रुवकुमारपाठकः, श्रीदीपक-पाण्डेयप्रभृतयः आचार्याः, भारतीयज्ञानपरम्परासंकायस्य छात्राश्च उत्साहपूर्वकम् स्थित्वा लाभन्विताः अभवन्।
अन्ते वैश्विकमङ्गलकामनया निरामयजीवनसिद्धये च प्रार्थनापूर्वकं शान्तिपाठेन सह कार्यक्रमस्य सफलसमापनम् अभवत्।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य जपान-देशे एकः कृत्रिम-बुद्धि-युक्तः यन्त्रमानव-भिक्षुः तन्त्रज्ञैः निर्मितः।
**नन्दिनी-** यन्त्रम् अपि भिक्षु-रूपेण कार्यं करोति इति महान् विस्मयः! परं पश्य, एकेन पञ्चवर्षीय-बालकेन विमान-चालन-पुस्तिकायां दोषः दृष्टः।
**काव्या-** बालकानां दृष्टिः अतीव सूक्ष्मा। सः बालकः तं दोषं विमान-संस्थायै विज्ञापितवान् अस्ति। अन्यद् वृत्तम्- लक्सम्बर्ग-विमान-पत्तने कश्चन पाकिस्थान-देशीयः पुरुषः 'भारतीयः अयम्' इति अन्येन यात्रिणा मतः।
**नन्दिनी-** विदेशेषु तादृशः भ्रमः सहजः एव। अन्ते च, अमेरिकीय-अन्तरिक्ष-संस्थायाः चन्द्र-यानं तन्त्रांश-दोषेण नाशितम्।
काव्या- महती हानिः एषा। अशुद्धेन तन्त्रांशेन सम्पूर्णं यानम् एव विपरीत-मुखी-कृतम्।

## लौकिकन्यायकोशः (४११)
## राधावेधोपमान्यायः

राधा इति शब्दस्य लक्ष्यधारणार्थम् आसनम् इति अर्थः।राधावेधः नाम कस्यचित् लक्ष्यस्य मध्यभागे लक्ष्यं तस्य वेधनम्।अर्जुनस्य नामसु 'राधाभेदिन्' इति एकम् अस्ति-- " सा चेद् यदि भवेत् कस्य सामग्रीयं सुदुर्लभा |
राधावेधोपमानेन धर्मप्राप्तिः प्रकीर्तिता ||
{ उपमितप्रपञ्चकथा पृष्ठानि ४१३,४२०,४३४ }

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**




## विज्ञानस्य सदुपयोगः आवश्यकः

ऋषितुल्यैः वैज्ञानिकैः नानाशोधपरीक्षणादिभिः सकष्टञ्च विज्ञानवस्तूनि समाजहिताय प्रदत्तानि सन्ति । तेषां वस्तूनां केवलः सदुपयोगः करणीयः मानवैः, दुरुपयोगः नैव कदाचिदपि ।
अस्मत्पूर्वजानां सामाजिकी स्थितिः पूर्वं यथा आसीत्, तथा इदानीं नावलोक्यते, एषा पूर्णतः परिवर्तिता अस्ति सम्प्रति । तदा बालाः ज्येष्ठानां पुरतः लज्जन्ते स्म, नितराञ्च तेभ्यः बिभ्यति स्म । बालाः पूर्णतः ज्येष्ठानाम् आधीन्ये आसन् । ज्येष्ठानां मार्गदर्शनं हि ते वाध्यतापूर्वकम् अनुकुर्वन्ति स्म । तेषां पुरतः भयात् न किमपि वक्तुमर्हन्ति स्म । परन्तु अधुना तथा नास्ति, वैपरीत्यं जातं तत्सर्वम् । ज्येष्ठाः हि तेभ्यः बिभ्यति अधुना । भौतिकविषयम् अधिकृत्य अधीतवन्तः युवानः सर्वत्र अधिकसङ्ख्यकाः सञ्जाताः शनैः। अध्यात्मज्ञानं तैः न प्राप्तं विद्यालयादिषु । तस्मात् सामाजिकं, नैतिकं, व्यावहारिकं च ज्ञानं तैः नार्जितम् । शिक्षिताः ते, तस्मात् कृषिकर्मश्रमादिभ्यः निवृत्ताः जाताः। तेषु अकर्मण्यालस्यादिकं नितरां बाधमानम् अभवत्।

पुनश्च, शनैः विज्ञानावदानं सञ्चारमाध्यमादिकम् आगतम् । तत्र ते बालाः अत्यन्तम् आकर्षिताः अभवन् । तस्य सकारात्मकपक्षं विहाय तैः नकारात्मकपक्षः स्वीकृतः। अस्माद् इतोऽपि तेषां बुद्धेः स्खलनं जातम् । इदानीं तेषां स्वकीयं 'गर्लफ्रेण्ड', 'वाँयफ्रेण्ड' चेति अभवत् । स्वकीयं दाम्पत्यजीवनं स्वच्छन्दतया तैः हि सुनिश्चितं क्रियते । तत्र पित्रोः सम्मतिस्थानम्, अनुमतिविषयः वा नास्ति । एवं स्वच्छन्दताकारणतः, तयोर्नवयुगलयोर्मध्ये सहसा उद्भूतात् मतानैक्यकारणतः वा तादृशाः किशोरी-किशोराः मार्गहीनाः, भ्रष्टाः च सञ्जाताः दृश्यन्ते । केचन तु आत्महत्यासदृशं विकटमार्गम् अपि आलिङ्गितवन्तः दृश्यन्ते । मोबाईलयन्त्रादीनां, विज्ञानप्रदत्तवस्तूनां दुरुपयोगो हि अस्याः दुःखदस्थितेः मूलकारणम् । फेसबुक-यूट्यूव इत्यादिषु सततं स्थापितानि नैकानि अश्लीलचित्राणि वृथा प्रलपादीनि च बालानां सरलमनः सहजतया हि अपहर्तुं शक्नुयुः । एतत्तु अद्यतनस्य समाजस्य कृते महद् दौर्भाग्यमेव । भव्यसमाजे, वृद्धसमाजे, विज्ञसमाजे वा एतादृशानाम् अश्लीलचित्राणां निर्लज्जतया, निर्भीकतया च स्थापनेन प्रदर्शनेन वा तेषां स्थापकानां चेत् कः लाभः इति न ज्ञायते । केवलं समाजकलुषाय एव तानि प्रभवेयुः। एतादृशानां ज्ञानान्धजनानां दुष्टमतीनां वा शीघ्रमेव निग्रहणं परमम् आवश्यकमधुना । तस्मादुच्यते विज्ञानवस्तु सदैव अनुकूलपक्षे हि स्वीकरणीयम्, प्रतिकूलपक्षे स्वीकरणन्तु स्वस्यैव विनाशाय कल्पते, नात्र सन्देहः इति ।

**✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः**

# AI कृत्रिमबुद्धेः प्रभावसम्मेलन(एआई-सम्मिट)समीक्षा

## डॉ विमलेश झा, डीएवी पब्लिक स्कूल, बरारी भागलपुर बिहार



अद्यतनीये विश्वे विज्ञानप्रौद्योगिकीक्षेत्रस्य विकासः अतिशयेन तीव्रगतिना प्रवर्तते। विशेषतः कृत्रिमबुद्धिः (Artificial Intelligence – एआई) नाम नूतनप्रौद्योगिकी विश्वव्यवस्थायां महान् परिवर्तनं जनयति। मानवजीवनस्य प्रायः सर्वेषु क्षेत्रेषु एआईइत्यस्य प्रयोगो दृश्यते—शिक्षायाम्, चिकित्सायाम्, उद्योगे, सञ्चारे, वित्तव्यवस्थायाम्, सुरक्षाक्षेत्रे च।
अस्मिन् परिवर्तिते वैज्ञानिकयुगे भारतदेशः अपि एआईइति क्षेत्रे स्वकीयं स्थानं दृढतया स्थापयितुं प्रयतते। कृत्रिमबुद्धिसम्मेलननामकस्य-अन्ताराष्ट्रियसम्मेलनस्य आयोजनं भारतस्य यांत्रिकक्षमतां प्रदर्शयितुं महत्त्वपूर्णम् अवसरं प्रदत्तवान्। अस्मिन् सम्मेलने भारतस्य नवोन्मेषशक्तिः, प्रतिभा, अनुसंधानक्षमता तथा भविष्यसम्भावनाः स्पष्टतया प्रकाशिताः अभवन्। प्रस्तुतलेखे वयं एआईसम्मेलने भारतस्य उपलब्धीनां वर्णनं करिष्यामः। तस्य समीक्षया ज्ञायते यत् भारतदेशः न केवलं परम्परासम्पन्नं राष्ट्रम् अस्ति, अपितु आधुनिकविज्ञानस्य क्षेत्रे अपि प्रगतिशीलः अस्ति।एआईसम्मेलनम् अन्ताराष्ट्रियस्तरे आयोजितम् एकं वैज्ञानिकसम्मेलनम् आसीत्। अस्य सम्मेलनस्य उद्देश्यम् आसीत्—कृत्रिमबुद्धेः विकासः, तस्य प्रयोगाः तथा भविष्यस्य योजनाः ।विश्वस्य विविधदेशेभ्यः वैज्ञानिकाः, अभियन्तारः, उद्योगपतयः तथा नीतिनिर्मातारः अस्मिन् सम्मेलने सहभागित्वं कृतवन्तः। एतत् सम्मेलनं केवलं वैज्ञानिकचर्चायाः मञ्चं न आसीत्, अपितु अन्ताराष्ट्रियसहयोगस्य अपि माध्यमम् आसीत्। भारतदेशस्य प्रतिनिधयः अपि अस्मिन् सम्मेलनस्य प्रमुखभागं अभवन्। भारतीयवैज्ञानिकैः स्व- अनुसन्धानकार्याणां प्रस्तुतीकरणं कृतम्। एआईसम्मेलने भारतस्य प्रतिभा विशेषरूपेण प्रकाशिताऽभवत्। भारतीयवैज्ञानिकाः तथा अभियन्तारः विश्वस्तरे स्वकीयं कौशलं प्रदर्शितवन्तः।

भारतदेशः युवाशक्तिसम्पन्नं राष्ट्रम् अस्ति। अस्मिन् देशे बहवः प्रतिभाशालिनः छात्राः सन्ति ये प्रौद्योगिकीक्षेत्रे महान् योगदानं कुर्वन्तः सन्ति। भारतीययुवकाः स्वप्रज्ञया नूतनान् उपायान् निर्मातुं समर्थाः सन्ति। एतत् सम्मेलनम् अस्याः प्रतिभायाः प्रत्यक्षप्रमाणम् अभवत्। अस्य सम्मेलनस्य एकः महत्वपूर्णः पक्षः आसीत् - भारतीयस्टार्टअप्-संस्थानानां सहभागिता। भारतीयस्टार्टअप्-संस्थाः नूतनविचाराणां विकासे अग्रणीस्थानं धारयन्ति। स्टार्टअप्-संस्थाभिः निर्मिताः एआई-आधारिताः उपकरणानि विशेषरूपेण प्रशंसितानि अभवन्। भारतीयसंस्थाभिः निर्मितानि सॉफ्टवेयरप्रणाल्यः अल्पव्यये अधिककार्यं कुर्वन्ति। एतत् भारतदेनस्य यान्त्रिकी विशेषता अस्ति। भारतीयभाषाणां कृते अपि एतत् सम्मेलनं महत्वपूर्णं आसीत्। भारतदेशे बहवः जनाः आङ्ग्लभाषां न जानन्ति। अतः भारतीयभाषासु एआई-इत्यस्य प्रयोगः अत्यावश्यकः अस्ति।भारतीयवैज्ञानिकाः भारतीयभाषाणां कृते एआईप्रणाल्यः विकसितवन्तः।एते प्रयत्नाः दर्शयन्ति यत् भारतदेशस्य प्रगतिः स्वभाषासु अपि सम्भविष्यति। भारतीयवैज्ञानिकाः सीमितसंसाधनैः अपि उत्कृष्टकार्यं कुर्वन्ति। सम्मेलने प्रस्तुतानि भारतीयप्रतिरूपाणि(मॉडल) अल्पव्ययेन निर्मितानि आसन्। एतत् वैश्विकक्षेत्रे भारतस्य विशेषपरिचयः अस्ति।अस्य सम्मेलनस्य माध्यमेन भारतदेशस्य यांत्रिकक्षमता विश्वस्तरे स्वीकृता अभवत् ।भारतीयवैज्ञानिकाः विश्वस्य विभिन्नसंस्थासु कार्यं कुर्वन्ति। तेषां प्रतिभा सर्वत्र प्रशंस्यते।
एतत् भारतस्य कृते गौरवस्य विषयः अस्ति। एआई-प्रौद्योगिकी शिक्षाक्षेत्रे अपि उपयोगिनी अस्ति। एआईइत्यस्य सहयोगेन छात्राः शीघ्रं शिक्षां प्राप्तुं शक्नुवन्ति। व्यक्तिगतशिक्षा (Personalized Learning) एआई-द्वारा सम्भवति। भारतदेशे एतस्य विकासः आरब्धः अस्ति। चिकित्साक्षेत्रे एआई-प्रयोगः अत्यन्तं लाभदायकः अस्ति। अनेन रोगनिदानं शीघ्रं भवति। रोगीणां उपचारस्य एषा उत्तमा पद्धतिः विद्यते।भारतदेशे चिकित्साक्षेत्रे एआई-प्रयोगः दिनानुदिनं वर्धमानः दृश्यते।
उद्योगक्षेत्रे एआई-प्रयोगः उत्पादनं वर्धयति। स्वचालनप्रणाल्यः (Automation) उद्योगान् अधिकप्रभावशालिनः कुर्वन्ति।
भारतदेशे उद्योगक्षेत्रे एआई-प्रयोगः वर्धमानः अस्ति। यद्यपि भारतदेशः एआई-क्षेत्रे प्रगतिशीलः अस्ति, तथापि अत्र केचन दोषाः सन्ति। तत्र सर्वप्रथमम् अनुसन्धानस्य अभावः दृश्यते। भारतदेशे अनुसन्धानक्षेत्रे निवेशः न्यूनः अस्ति।विकसितदेशेषु अधिकनिवेशः दृश्यते। पुनश्च सर्वत्र समानशिक्षा नास्ति। ग्रामेषु शिक्षासुविधाः न्यूनाः सन्ति। सम्प्रति ग्रामेषु इंटरनेट्-सुविधा न्यूनाऽस्ति। अस्मात् कारणात् विकासे बाधा आगच्छति। भारतदेशस्य भविष्यं उज्ज्वलम् अस्ति। युवाशक्तिः भारतस्य मुख्यबलम् अस्ति। यदि समुचिता नीतिः भवेत् तर्हि भारतदेशः अग्रे गमिष्यति।अस्मिन् सन्दर्भे वयं वक्तुं शक्नुमो यत् इदम् एआई-सम्मेलनं भारतस्य यांत्रिकक्षमतां प्रदर्शयितुं सफलम् अभवत्।एतत् सम्मेलनं भारतस्य प्रगतिपथः संकेतः अस्ति। भारतदेशः यदि स्वप्रतिभायाः सम्यक् उपयोगं करिष्यति तर्हि भविष्ये विश्वगुरुः भविष्यति।अन्ते च"विज्ञानं विना प्रगतिर्नास्ति,नवोन्मेषं विना विज्ञानं नास्ति।
भारतस्य भविष्यं विज्ञानाधारितमेव भविष्यति।

## कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालये भित्तिपत्रिकायाः भव्योद्घाटनम्



हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः नलबारी, असमः। असमप्रदेशस्य प्रतिष्ठितस्य कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालयस्य सर्वदर्शनविभागे एका नूतना उपलब्धिः पञ्जीकृता। विभागे 'कैवल्यमञ्जरी' इति नाम्नः भित्तिपत्रिकायाः (Wall Magazine) समुद्घाटनं सोत्साहं सम्पन्नम्।
अस्याः पत्रिकायाः उद्घाटनं विश्वविद्यालयस्य माननीयैः कुलगुरुभिः आचार्यैः प्रह्लाद रा.जोशीमहोदयैः स्वकरकमलैः कृतम्। अस्मिन् अवसरे कुलगुरुमहोदयाः पत्रिकायाः प्रशंसां कुर्वन्तः उक्तवन्तः यत् ईदृशाः प्रयासाः छात्राणां बौद्धिकविकासाय अत्यन्तं आवश्यकाः सन्ति। अस्याः भित्तिपत्रिकायाः मुख्यविषयः 'जन्म-जन्मान्तरवादः' अस्ति ।पत्रिकायाम् श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन प्रतिपादितस्य जन्मान्तरवादस्य गम्भीरं विवेचनं कृतम् अस्ति। तत्रैव सर्वेषाम् आस्तिक-नास्तिक-दर्शनानां मतानुसारं जन्मान्तरवादस्य स्वरूपं स्पष्टीकृतम्। तत्र सांख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्त-चार्वाक-बौद्ध-जैनदर्शनानुसारं जन्मान्तरप्राप्तेः विषये प्रतिपादितम्।अपि च, उपनिषत्सु वर्णितस्य जन्मान्तरविषयस्य अपि अत्र सुन्दरं प्रतिपादनं दृश्यते। इतोपि पुण्यपापकर्मणां तत्फलभोगविषये च अपि प्रतिपादितमासीत्।अस्य दार्शनिकविषयस्य उपरि प्रकाशनं विभागस्य विद्यार्थिभिः कृतम्। तैः अतीव सम्यक्तया विषयस्य समुस्थापनं कृत्वा दर्शनस्य गम्भीरतत्त्वावबोधः अपि विस्तरेण कारितः। तत्र निर्णायकमण्डल्या अपि बहवः प्रश्नाः कृताः येषां सम्यक् समाधानं छात्रैः विधत्तम्। अस्मिन् उद्घाटनावसरे सर्वदर्शनविभागस्य अध्यक्षः आचार्यः रणजीतकुमारतिवारी महोदयः, विभागीयाध्यापिका आचार्या उमामाहेश्वरी बी, सुश्रीलोपामुद्रागोस्वामी तथा अन्ये अतिथ्यध्यापकाः, शोधछात्राः अन्ये छात्राः च बहुसंख्यया उपस्थिताः आसन्। सर्वे छात्राः अस्याः पत्रिकायाः माध्यमेन दार्शनिकविषयान् पठित्वा लाभान्विताः भविष्यन्ति। अयं कार्यक्रमः विश्वविद्यालयस्य शैक्षणिकवातावरणं अधिकं सुदृढं करोति।




## संता-वन्ता इत्यनयोः हास्य-संवादः

**संता-** भो वन्ता! पश्य, अस्मिन् पत्रे लिखितं वर्तते यत् "पठनेन ज्ञानं वर्धते, परन्तु अधिकपठनेन मस्तिष्के पीडा भवति।"
**वन्ता-** सत्यं वदसि मित्र! अतः एव अहम् अद्यतः पठितुं न शक्नोमि।
**संता-** किमर्थं भो? किं तव शिरसि पीडा अस्ति?
**वन्ता-** न हि, मम मस्तिष्के तु पीडा नास्ति, किन्तु मम मस्तिष्के ज्ञानं मास्तु इति अहं चिन्तयामि!
**संता-** धिक् त्वाम्! एवं किमर्थं कथयसि?
**वन्ता-** पश्य, यदि ज्ञानं भविष्यति तर्हि भारः वर्धिष्यते, भारः वर्धिष्यते तर्हि मम शिरः अधः नमिष्यति, शिरः नमिष्यति तर्हि अहं मार्गं कथं द्रक्ष्यामि?
**संता-** (शिरः ताडयति) तव तर्कं श्रुत्वा तु मम एव मस्तिष्के पीडा आरब्धा!